**षष्ठ: पाठ:**

# यशः शरीरम्

**संसारे बहव: जना: जन्म ग्रहणन्ति किन्तु तेषु अल्पजना: एव संसारे ख्यातिं प्राप्य यशो लभन्ते। ये स्वसुखं स्वार्थं च परित्यज्य लोकमङ्गलभावनया लोककल्याणार्थं कार्यं कुर्वन्ति ते एव यश:शरीरेण जीवन्ति। ये स्वार्थमात्रं चिन्तयन्ति ते तु जीवन्तोऽपि मृता इव तिष्ठन्ति।**

**अस्या: भावनाया: विकासाय बालावबोधनाय च सङ्कलिता कथा अत्र प्रस्तूयते।**

गङ्गातीरे मार्कण्डेय: नाम कश्चन मुनि: वसति स्म। तस्य गुरुकुले बहव: शिष्या: आसन्। वासुदेव: तस्य प्रियशिष्य:। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरु: तम् आहूय अवदत्-''शिष्य! अधुना भवान् सर्वविद्यापारङ्गत: अस्ति। अत: इत: परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम्। किन्तु गृहस्यान्त: न गन्तव्यम्'' इति।

वासुदेव: तस्मिन् एव दिने द्वारकापुरं प्रति प्रस्थितवान्। दिनत्रयात्मकस्य प्रयाणस्य अनन्तरं तं ग्रामं प्राप्य स: ग्रामद्वारे स्थितान् जनान् अपृच्छत् - ''देवराजस्य गृहं कुत्र?'' इति। ''वृथा किमर्थं गम्यते तत्र?'' इति उपेक्षया वदन्त: ते देवराजगृहस्थलं सूचितवन्त:। अग्रे गत: स: कूपात् जलम् उद्धरन्तीं महिलां याचित्वा जलं प्राप्य तत् पिबन् ताम् अपृच्छत् - ''देवराजगृहं कुत्र?'' ''तस्य पापिन: नाम किमर्थं मम पुरत: उच्चारयति भवान्?'' इति वदन्ती सा महिला तत: निरगच्छत् एव।

किञ्चिदग्रे गत: वासुदेव: कञ्चित् देवालयम् अपश्यत्। तत्र प्रसादत्वेन भोजनवितरणं प्रचलति स्म। नितरां बुभुक्षित: वासुदेव: जनानां पङ्क्तौ उपाविशत्। भोजनसमये स्वपार्श्वे उपविष्टवन्तं कञ्चित् जनम् अपृच्छत् वासुदेव: - ''देवराज: किं धनिक:?'' इति। तदा स: पार्श्वस्थ: जन: - ''धिक् भवन्तम्। भोजनकाले तस्य पापिन: नाम स्मारितम्'' इति वदन् भोजनं परित्यज्य उत्थित: एव। एतत् दृष्ट्वा परिवेषका: वासुदेवाय अन्नं पायसादिकं न परिविष्टवन्त: एव। अपूर्णोदर: एव स: तत: उत्थितवान्।

दूरात् एव देवराजस्य गृहं दृष्ट्वा प्रत्यागत: स: दिनद्वयस्य अनन्तरं गुरुकुलं प्राप्तवान्। गुरु: तं पुन: अवदत् - ''रामनाथपुरं गत्वा रामदेवस्य गृहं ज्ञात्वा आगन्तव्यम्'' इति। शिष्य: अनन्तरदिने एव रामनाथपुरं प्रति प्रस्थितवान्। मध्येमार्गं तेन सोमपुरं प्राप्तम्। तत्र स्वगृहस्य पुरत: उपविष्टां काञ्चित् मातरम् अवदत् स: - ''अम्ब! किञ्चित् जलं ददातु'' इति।

जलं दत्वा माता अपृच्छत् - ''भवता कुत्र गम्यते?'' इति।

''रामदेवस्य गृहं प्रति'' इति अवदत् वासुदेव:।

''अहो, प्रात: स्मरणीय: स:'' इति उक्त्वा सा माता वासुदेवं सस्नेहम् अन्त: नीत्वा भोजनादिकं दत्वा सत्कृतवती। तत: निर्गत: वासुदेव: रामनाथपुरं प्राप्य 'रामदेवस्य गृहं कुत्र?' इति कञ्चित् अपृच्छत्। स: अपि सत्कृत्य स्वयम् आगत्य रामदेवगृहं प्रादर्शयत्। दूरात् एव तत् दृष्ट्वा वासुदेव: गुरुकुलं प्रत्यगच्छत्।

दिनद्वयस्य अनन्तरं गुरुः अकथयत्- ''वासुदेव ! भवान् इतः स्वगृहं गन्तुम् अर्हति। गमनात् पूर्वं भवता देवराज - रामदेवयोः पूर्णः परिचयः प्राप्तव्यः'' इति।

एतम् आदेशं पालयन् वासुदेवः पुनरपि द्वारकापुरं प्राप्य देवराजस्य गृहम् अगच्छत्। वैभवोपेतं गृहं तत्। द्वाररक्षकः तस्य प्रवेशं निषिद्धवान्। बहुधा प्रार्थना यदा कृता तदा सः अन्तः गत्वा देवराजं वासुदेवागमनं निवेदितवान्। कोपेन एव बहिः आगत्य देवराजः - ''किं धनं याचितुम् आगतं भवता ? मया कस्मैचित् किमपि न दीयते। मम विश्रान्तिः नाशिता भवता। निर्गम्यताम् इतः'' इति तर्जयित्वा तं प्रेषितवान्।

ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्। पर्णैः निर्मितं प्राचीनं गृहं तत्। कश्चन् युवकः तं सादरं स्वागतीकृत्य पानीयभोजनादिभिः तं सत्कृत्य विश्रान्त्यर्थं व्यवस्थाम् अकरोत्। विश्रान्तेः अनन्तरं सः 'अहं रामदेवस्य पुत्रः' इति स्वपरिचयम् उक्त्वा आगमनकारणम् अपृच्छत्। यदा वासुदेवः रामदेवस्य दर्शनेच्छां प्राकटयत् तदा पुत्रः एकं भावचित्रं प्रदर्श्य - ''मम पिता विंशतिवर्षेभ्यः पूर्वम् एव दिवं गतः। इदानीं तस्य स्मृतिमात्रम् अस्ति लोके'' इति विषादेन अवदत्। रामदेवः ग्रामस्य विकासाय देवालय-चिकित्सालय-विद्यालय-ग्रन्थालय-धर्मशालोद्यानानि यानि कारितवान् तत्सर्वम् अपश्यत् वासुदेवः। ग्रामे सर्वे रामदेवं सगौरवं स्मरन्ति स्म।

'देवराजे जीवति सति अपि कोऽपि तस्मिन् आदरवान् न। रामदेवः तु विंशतिवर्षेभ्यः पूर्वम् एव दिवं गतः चेदपि जनाः प्रतिदिनं तं स्मरन्ति। यः समाजहितं चिन्तयति सः मृतोऽपि जीवति। यः स्वार्थमात्रं चिन्तयति सः तु जीवन्नपि मृतः एव' इति अवगतवान् वासुदेवः 'मया रामदेवस्य जीवनम् एव अनुसरणीयम्' इति सङ्कल्प्य स्वग्रामम् अगच्छत्।

## शब्दार्थः

बहवः - बहुत सारे। आहूय - बुलाकर। सर्वविद्यापारङ्गतः - समस्त विद्याओं में निपुण। गृहस्यान्तः - घर के अन्दर। वृथा - व्यर्थ में। वदन्तः - बोलते हुए। उद्धरन्तीम् - निकालती हुई को। याचित्वा - माँगकर। पिबन् - पीते हुए। पुरतः- सामने की ओर। उच्चारयति - उच्चारण करता है/बोलता है। वदन्ती - बोलती हुई। निरगच्छत् - चली गई/निकल गई। प्रसादत्वेन - प्रसाद के रूप में। नितराम् - बहुत अधिक। बुभुक्षितः - भूखा। पङ्क्तौ - पंक्ति में/पंगत में। स्वपार्श्वे - अपने पास में। पार्श्वस्थः - पास में स्थित/बैठे हुए। धिक् - धिक्कार है। पापिनः - पापी का। वदन् - बोलते हुए। उत्थितः - उठ गया। परित्यज्य - छोड़कर। परिवेषकाः - खाना परोसने वाले। पायसादिकम् - खीर इत्यादि। परिविष्टवन्तः - परोसा। प्रत्यागतः - लौट आया। ज्ञात्वा - जानकर। मध्येमार्गम् - रास्ते के बीच में। सत्कृत्य - सत्कार करके। प्रादर्शयत् - दिखाया। वैभवोपेतम् - वैभव, विशालता से युक्त को। निषिद्धवान् - रोका। निर्गम्यताम् - निकल जाओ। तर्जयित्वा - डाँटकर। दर्शनेच्छाम् - देखने की इच्छा को। भावचित्रम् - छायाचित्र को। मृतोऽपि - मरकर भी। जीवन्नपि - जीते हुए भी। सङ्कल्प्य - सङ्कल्प लेकर।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) मार्कण्डेयः नाम ऋषिः कुत्र वसति स्म ?

(ख) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

(ग) वासुदेवः प्रथमं कस्य गृहं प्रति प्रस्थितः ?

(घ) रामदेवः कस्मिन् ग्रामे वसति स्म ?

(ङ) जनाः प्रतिदिनं कं स्मरन्ति स्म ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) कः मृतोऽपि जीवति ?

(ख) कः जीवनन्नपि मृतः एव ?

(ग) देवालये किं प्रचलति स्म ?

(घ) जलं दत्वा माता किम् अपृच्छत् ?

(ङ) भोजनपरिवेषकाः किं कृतवन्तः ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) कोपेन देवराजः किम् उक्तवान् ?

(ख) पुत्रः वासुदेवं विषादेन किमुक्तवान् ?

(ग) यदा वासुदेवस्य अध्ययनं समाप्तं तदा गुरुः तमाहूय किमवदत् ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(बहवः, भोजनम्, मध्येमार्गम्, रामदेवस्य, देवालयम्)

(क) तत्र प्रासादत्वेन ................................. प्रचलति स्म।

(ख) वासुदेवः कञ्चित् ............................ अपश्यत्।

(ग) मया ................................. जीवनम् एव अनुसरणीयम्।

(घ) गुरुकुले ............................ शिष्याः आसन्।

(ङ) ............................ तेन सोमपुरं प्राप्तम्।

5. **यथायोग्यं योजयत –**

| ‘अ’ | ‘आ’ |
|---|---|
| (क) मार्कण्डेयः | रामदेवः |
| (ख) वासुदेवः | गुरुकुलम् |
| (ग) द्वारकापुरम् | मुनिः |
| (घ) रामनाथपुरम् | देवराजः |
| (ङ) गङ्गातीरे | शिष्यः |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) गुरुकुले बहव: शिष्या: आसन्। ☐

(ख) मध्येमार्गं तेन रत्नपुरं प्राप्तम्। ☐

(ग) ग्रामे सर्वे देवराजं सगौरवं स्मरन्ति स्म। ☐

(घ) रामदेव: प्रात:स्मरणीय: आसीत्। ☐

(ङ) रामदेवस्य गृहं वैभवोपेतम् आसीत्। ☐

7. **अधोलिखितपदानां मूलपदं विभक्तिं वचनं च लिखत -**

| पदम् | मूलपदम् | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा - विषादेन | विषाद | तृतीया | एकवचनम् |
| (क) कूपात् | | | |
| (ख) गङ्गातीरे | | | |
| (ग) दानेन | | | |
| (घ) मम | | | |
| (ङ) तम् | | | |
| (च) ग्रामे | | | |

8. **उदाहरणानुसारं पदानां प्रकृतिं प्रत्ययं च पृथक्कुरुत -**

| पदम् | धातु: | प्रत्यय: |
|---|---|---|
| यथा- वदन्ती | वद् | शतृ |
| (क) गन्तव्यम् | | |
| (ख) प्रस्थितवान् | | |
| (ग) प्राप्तवान् | | |
| (घ) उक्त्वा | | |
| (ङ) सत्कृत्य | | |
| (च) आगत्य | | |
| (छ) याचित्वा | | |
| (ज) वदन्त: | | |

9. **अधोलिखितशब्दानां पर्यायशब्दान् लिखत -**

यथा -जलम् वारि, अम्बु

(क) मुनि:

(ख) युवक:

(ग) अम्ब

(घ) बुभुक्षित:

10. **अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत -**

(क) तत: वासुदेव: रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

(ख) गङ्गातीरे मार्कण्डेय: नाम कश्चन मुनि: वसति स्म।

(ग) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

(घ) किञ्चिदग्रे गत: वासुदेव: कञ्चित् देवालयम् अपश्यत्।

(ङ) शिष्य: अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(च) वासुदेव: तस्य प्रियशिष्य: आसीत्।

11. **प्रदत्तं चित्रम् अवलम्ब्य पञ्चवाक्यानि रचयत -**



## योग्यताविस्तार: -

- संस्कृतसाहित्यस्य अन्या: कथा: अन्विष्य पठत।
- अन्ये ये महापुरुषा: यश:शरीरेण ख्याता: सन्ति तेषां जीवनवृत्तान्तं कथारूपेण लिखत।